M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1189

Title: Thang Mano Yoga

1189

Complete

Trang mane Yoga	Title
	Author
	Editor
	Year, Vols.
	Publisher
1189	Remarks

श्रीगणेशाय नमः त्वङ्मनोयोगस्य जन्यज्ञानत्वावच्छिन्न जन्यात्मविशेषगुणत्वावच्छिन्नं प्रति वा हेतुत्वे माना
भावः अथ स्वापे तदीयद्वितीयादिक्षणे ज्ञानोत्पत्तिवारणाय जन्यज्ञानमात्रं प्रति त्वङ्मनोयोगस्य हेतुत्वमावश्यकं आ
त्मनो विभुतया पुरीतति मनःसंयोगात्मक सुषुप्त्युत्पत्तिसमये पुरीतत्त्ववच्छेदेन आत्ममनःसंयोगस्याप्युत्पत्तेः आत्म
मनःसंयोगं विना श्वासप्रश्वासहेतुजीवनयोनियत्नानुत्पत्तेश्च एतेन आत्ममनःसंयोगस्य आत्ममनःसंयोगत्वेन
मनःसंयोगत्वेन वा न असमवायिहेतुत्वं गौरवात् अपि तु वैजात्येन सुषुप्त्युत्पत्तिकालीनात्ममनःसंयोगे च नैतादृ
शवैजात्यं तस्य फलबलकल्प्यत्वात् अतः सुषुप्तौ न ज्ञानोत्पत्तिरित्यपास्तं विजातीयात्मसंयोगस्य असमवायिका
रणत्वस्य कार्यतावच्छेदकं न जन्यज्ञानत्वं किं तु लाघवात् ज्ञानेच्छादिसाधारणं जन्यात्मविशेषगुणत्वं तथा च श्वास
प्रश्वासहेतुजीवनयोनियत्नान्यथानुपपत्त्या विजातीयात्ममनःसंयोगस्यापि तदानीमावश्यकत्वात् त्वङ्म
नःसंयोगस्य तदानीं त्वयदा मनस्त्वचं परिहृत्य पुरीतति मनु विशति तदा सुषुप्तिरित्यभिधानात् न च सुषुप्तिद
शायां ज्ञानोत्पत्तिवारणाय जन्यज्ञानमात्रं प्रति प्राणमनःसंयोगस्यैव हेतुत्वमभ्युपेयते न तु त्वङ्मनोयोगस्ये
ति वाच्यं त्वक्प्राणमनस्त्वयोरेव जातिरूपतया विनिगमकत्वात् मैवं सुषुप्तिदशायां कीदृशं ज्ञानमापाद्यते न
तावच्चाक्षुषस्पार्शनादिकं मनःसंयोगविरहादेव तदानीं तदनुत्पत्तेः नाप्यनुमित्यादिः परामर्शाद्यभावात् नापि स्मृति
रुद्बोधकस्य फलबलकल्प्यत्वात् न च आत्ममनःसंयोगस्य सत्त्वात् तदानीमात्मादिमानसापत्तिः अतस्तद्वारणा
य जन्यज्ञानत्वावच्छिन्ने मानसत्वावच्छिन्नं प्रति वा त्वङ्मनोयोगस्य हेतुत्वं आवश्यकमिति वाच्यं ज्ञानाद्यात्मकवि
शेषगुणविषयकप्रमादिमानसस्यालीकतया सुषुप्त्युत्पत्तिकाले ज्ञानादिविरहादेव सुषुप्त्यनन्तरमात्मादिमा
नसानुत्पत्तेः स्वापप्रयोजकमनःक्रियोत्पत्तिकाले तादृशमनःपूर्वदेशविभागोत्पत्तिकाले वा तस्य ज्ञानादेराशुत
विनाशितया सुषुप्त्युत्पत्तिकाले च आत्ममनःसंयोगस्य असमवायिकारणस्य पूर्वमभावादेव ज्ञानाद्यनुत्पत्तेः न च म
नःपूर्वदेशविभागकालोत्पन्नस्य अपेक्षाबुद्ध्यात्मकज्ञानस्य सुषुप्तिकाले सत्त्वात् तद्विषयकप्रत्यक्षापत्तिरिति वाच्यं
सुषुप्त्युत्पत्तेः पूर्वं मनःपूर्वदेशविभागोत्पत्तिसमये अपेक्षाबुद्ध्यात्मकज्ञानोत्पादे प्रमाणाभावात् अपेक्षाबुद्धेरपि

क्षणत्रयावस्थायित्वे मानाभावाभावाच्च नच सुषुप्तिप्रयोजकमनःसंयोगनाशकालोत्पन्न ज्ञानादेः सुषुप्तिदशायामवस्थानसंभव इतिवाच्यं असमवायिकारणस्य कार्यसह
भावेन हेतुतया मनःपूर्वसंयोगनाशदशायां ज्ञानोत्पादासंभवात् नचैवस्य असमवायिकारणनाशात्कार्यनाशः तस्यैव कार्यसहभावेन हेतुतया मनःसंयोगस्य कार्यसह
त्वङ्मनः भावेन असमवायिकारणत्वे मानाभाव इतिवाच्यं त्वङ्मनोयोगस्य अतिरिक्तस्य कारणतापेक्षया तावन्मात्रकल्पनया एव लघुत्वात् नच आत्ममनःसंयोगस्य अप्रमनः
संयोगत्वेन असमवायिकारणत्वं किंतु लाघवात् संयोगत्वेन तथाच नच यत्किंचित्संयोगे कार्यसहवर्तित्वमस्त्येवेतिवाच्यं त्वङ्मनोयोगव्यतिरिक्तस्य कारणतापेक्षया ता
वन्मात्रकल्पनाया एव लघुत्वात् नच आत्ममनःसंयोगस्य कार्यसहवृत्तितया हेतुत्वेपि यत्र मनःक्रियया न पुरीतति मनःसंयोगात्मके सुषुप्त्युत्पादः किंतु पूर्वदेशसंयुक्तमेव मन
सि पुरीतति संयोगरूपस्य व्यापत्तत्र स्यापत्तिप्राक्काले ज्ञानोत्पत्तिसंभव इतिवाच्यं तादृशपुरीतति क्रियया पुरीतति संयोगस्य सुषुप्तिविरहात् यदा मनस्त्वचं परित्यज्य पुरीतति म
नु विशति तदा सुषुप्तिरिति अभिधानात् केचित्तु सुषुप्त्यनंतरज्ञानोत्पादवारणाय जन्यज्ञानत्वावच्छिन्नं प्रति आत्ममनःसंयोगस्यैव सुषुप्तिकालीनमनःसंयोगव्यावृत्तत्वेनास
न हेतुत्वमुपेयते नतु त्वङ्मनोयोगस्य नच विनिगमकाभावात् त्वङ्मनोयोगस्यापि वैजात्येन हेतुत्वं दुर्वारं ज्ञानेच्छासाधारणजन्यत्वमविशेषगुणत्वावच्छिन्नं प्रत्यात्ममन
नःसंयोगस्य असमवायिकारणतया तत्रापि आवश्यकत्वादिति वाच्यं आत्ममनःसंयोगस्य वैजात्येन हेतुत्वे समवायस्य प्रत्यासत्तित्वे लाघवात् त्वङ्मनोयोगस्य हेतुत्वे
छेदकत्वस्यैव प्रत्यासत्तित्वे गौरवात् कर्मसंयोगजन्यतावच्छेदकवैजात्यस्याधिकस्य कल्पने गौरवापत्तेश्च स्यादेतत् उक्तक्रमेणैव सुषुप्त्यनंतरज्ञानोत्पत्तिवारण
संभवेन आत्ममनःसंयोगस्यापि अतिरिक्तकारणत्वकल्पने मानाभावात् मिश्रास्तु सुषुप्त्यनंतरज्ञानोत्पत्तिवारणाय चर्ममनःसंयोग एव जन्यज्ञानसामान्ये हे
तुरभ्युपेयते नतु त्वङ्मनोयोगः नच विनिगमनाविरहः जन्यज्ञानसामान्ये त्वङ्मनोयोगस्य हेतुत्वे रसादिसाक्षात्कारकाले त्वचा द्रव्यग्रहापत्तेः सामान्यसा
मग्रीसत्त्वात् त्वङ्मनोयोगस्यावश्यकत्वात् रसादिसाक्षात्कारसामग्र्याः प्रतिबंधकत्वाभ्युपगमेतिगौरवादिति स्यादेतत् तदप्यसत् रसादिसाक्षात्कारकाले द्रव्येण समं त्वक्
संनिकर्षे एव मानाभावेन तदभावादेव त्वाचद्रव्यसाक्षात्कारापत्तेरभावात् तावता मानसत्वावच्छिन्नं प्रति त्वङ्मनोयोगस्य हेतुत्वे बाधकाभावाच्च उक्तक्रमेणैव सु
षुप्त्यनंतरज्ञानानुत्पादसंभवे चर्ममनःसंयोगस्यापि हेतुत्वे मानाभावः केचित्तु सुषुप्त्यनंतरज्ञानोत्पत्तिवारणाय शरीरमनःसंयोग एव जन्यज्ञानसामान्ये मानस
सामान्ये वा हेतुरुपेयते नतु त्वङ्मनोयोगः शरीरसंयोगस्य त्वक्संयोगव्याप्यतया सुषुप्तिदशायां त्वङ्मनोयोगस्य शरीरमनोयोगस्यापि हेतुत्वात् नच
शरीरत्वमपेक्ष्य कल्प्यजातिरूपतया लघुत्वेन त्वङ्मनोयोग एव हेतुरुचित इतिवाच्यं शरीरमनःसंयोगस्यापि न शरीरमनःसंयोगत्वेन हेतुत्वं येन शरीरत्वमेव
ग्राः अपितु शरीरनिष्ठतया मनःसंयोगत्वेन समवायावच्छेदकत्वघटितसामानाधिकरण्यप्रत्यासत्तिः कारणविशिष्टसमवायः कार्यविशेष्यतावच्छेदकत्वं यद्वा
संयोगसंबंधेन शरीरनिष्ठतया मनस्त्वेन हेतुत्वं कार्यतावच्छेदकसंबंधश्चावच्छेदकत्वं त्वङ्मनोयोगस्य हेतुत्वे तु त्वक्त्वसंयोगत्वयोरवच्छेदककोटिप्रवेशस्यावश्यकत
या गौरवात् नच त्वङ्मनोयोगस्यापि त्वङ्मनःसंयोगत्वेन न हेतुत्वं अपितु वैजात्येन अतो न त्वक्त्वसंयोगत्वयोः प्रवेश इतिवाच्यं तथाप्यतिरिक्तवैजात्यक
ल्पनामपेक्ष्य मनस्त्वेनैव हेतुताया लघुत्वादिति स्यादेतत् तदप्यसत् स्वापोत्तरज्ञानस्योक्तक्रमेणासंभवात् शरीरमनःसंयोगस्याप्यतिरिक्तकारणत्वे मान
भावादिति संक्षेपः इति त्वङ्मनोयोगस्य जन्यज्ञानहेतुत्वखंडनं संपूर्णं शिवार्पितम्